# Yamaproktam Shivarchanopadesham 1

# यमप्रोक्तं शिवार्चनोपदेशम् १

## Document Information

Text title : Yamaproktam Shivarchanopadesham 1

File name : yamaproktaMshivArchanopadesham1.itx

Category : shiva, shivarahasya, upadesha, advice

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 27 madhyArjunamahimAnuvarNanam | 640-651||

Latest update : June 16, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 16, 2024

*sanskritdocuments.org*

# यमप्रोक्तं शिवार्चनोपदेशम् १

(शिवरहस्यान्तर्गते उग्राख्ये)
शैवधर्मरतामर्त्या भित्वान्तः सूर्यमण्डलम् ।
प्रयान्ति शिवसायुज्यं स्वेष्टबन्धुसमन्विताः ॥ ६४० ॥

मुने चरमदेहानां शैवाचाररतात्मनाम् ।
महेश्वरप्रसादेन मुक्तिर्भवति वस्तुतः ॥ ६४१ ॥

मृल्लिङ्गपूजनं श्रौतं मोक्षदं सुलभं मुने ।
कृतं येन प्रयत्नेन स मुक्तो भवति ध्रुवम् ॥ ६४२ ॥

मृल्लिङ्गपूजामात्रेण सद्यस्तुष्यति शङ्करः ।
सन्तुष्टः स ददात्येव भुक्ति मुक्ति च वस्तुतः (देहिनाम्) ॥ ६४३ ॥

मृल्लिङ्गपूजनं श्रौतं राज्यस्वर्गापवर्गदम् ।
तत्कल्पलतिकेवेष्टं किं किं नैव (वा न) प्रयच्छति ॥ ६४४ ॥

शिवैकशरणाः शैवाः शिवलिङ्गार्चनप्रियाः ।
भुक्त्वा स्वाभीप्सितान्भोगानन्ते मुक्ता भवन्ति च ॥ ६४५ ॥

शैवेभ्य एव दास्यामि मुक्तिमित्याह शङ्करः ।
अतो मुनेतदन्येषां मुक्तिरत्यन्तदुर्लभाः ॥ ६४६ ॥

येन चीर्णं प्रयत्नेन श्रौतम्पाशुपतं व्रतम् ।
तेन लब्धा मुक्तिकान्ता महादेव प्रसादतः ॥ ६४७ ॥

येन पञ्चाक्षरो जप्तोभस्मोद्धूलनपूर्वकम् ।
तेन लब्धा मुक्तिकान्ता महादेव प्रसादतः ॥ ६४८ ॥

येन स्मृतो महादेवो भस्मोद्धूलनपूर्वकम् ।
तेन लब्धा मुक्तिकान्ता महादेव प्रसादतः ॥ ६४९ ॥

येन ध्यातो महादेवो भस्मोद्धूलनपूर्वकम् ।

तेन लब्धा मुक्तिकान्ता महादेव प्रसादतः ॥ ६५० ॥

बहुनोक्तेन किं वाक्यं सत्यमेतन्मुनेशृणु ।
सर्वान्देवान्परित्यज्य शिवः पूज्यो मुमुक्षुभिः ॥ ६५१ ॥

॥ इति शिवरहस्यान्तर्गते यमप्रोक्तं शिवार्चनोपदेशं १ सम्पूर्णम् ॥

- ॥ श्रीशिवरहस्यम् । उग्राख्यः सप्तमांशः । अध्यायः २७ मध्यार्जुनमहिमानुवर्णनम् । ६४०-६५१ ॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 27 madhyArjunamahimAnuvarNan . 640-651..

Notes:
Yama यम; delivers Upadeśa उपदेश about worshiping Śiva शिव, especially through the worship of the Mṛlliṅga मृल्लिङ्ग.

Proofread by Ruma Dewan

*Yamaproktam Shivarchanopadesham 1*
pdf was typeset on June 16, 2024

Please send corrections to *sanskrit@cheerful.com*